अङ्क-२६
जुलाई-दिसम्बर २०१५
**वेदविद्या**
ISSN-2230-8962

# वैदिकपरम्परारक्षणे नारीणां भूमिका

**डॉ. शारदासामन्तरायः**

**वेदेषु नारीणां वैशिष्ट्यप्रतिपादनम् ; तथा तासां यज्ञकार्येषु भूमिका -**

वैदिककाले भारतवर्षस्य सामाजिकव्यवस्था अतीव आदर्शस्थानीया, शृङ्खलिता तथा सुसमृद्धा आसीत्, यत्र सर्वदा एव नार्यः सर्वोत्कृष्टं सम्मानार्हं स्थानमधिकृतवत्यः। ऋषिदेशस्य भारतस्य इतिहासपृष्ठायां वृहदारण्यकोपनिषदः सामाजिकी स्थितिः गौरवोज्ज्वला मूर्द्धन्यभूता च आसीत्, यस्मिन् समये नार्यः दार्शनिकविचारधारायम् उद्बुद्धाः आसन्, तथा च दार्शनिकैः ऋषिभिः सार्द्धं जीवनदर्शनसम्बन्धि-सत्यान्वेषणे नित्यमेव निरताः तिष्ठन्ति स्म। दार्शनिकतत्त्वानुसन्धानप्रसङ्गे विविधतर्कक्षेत्रे अपि ताः अंशग्रहणां कृत्वा स्वकीयपाण्डित्यम्, अम्लानं यशश्च विद्वत्सङ्गोष्ठीषु प्रतिपादितवत्यः। मिथिलानरेशस्य राजर्षेः जनकस्य विद्वज्जनमण्डितायां राजसभायां ब्रह्मस्वरूपप्रसङ्गे तथा आत्मतत्त्वनिरूपणमाधारीकृत्य याज्ञवल्क्याय तस्य पत्नी प्रश्नं पृष्टवती, तथा तस्यां सभायां स्वविचारमुपस्थापयन् निजप्रतिभां प्रदर्शितवती। धन्याः ताः ब्रह्मवादिन्यः, याः अद्याऽपि अस्माकं कृते आदर्शस्थानीयाः प्रातः स्मरणीयाश्च विराजन्ते। अनेकाः वैदिकनार्यः परिवारसंगठनात् प्रारभ्य उन्नतसमाजनिर्माणक्षेत्रे, शिक्षार्जनप्रसङ्गे, शत्रुविनाशार्थं युद्धपरिचालनायम्, अध्यात्मतत्त्वमाधारीकृत्य तर्कवितर्कसमयेऽपि प्रचण्डपारदर्शितां प्रदर्शितवत्यः।

देवभूमिभारतवर्षस्य सुसमृद्धपरम्परा-संस्कृति-ज्ञान-विज्ञानादीनां बाहकः तथा धारकः भवति वेदः, यत्र आर्यऋषीणाम् उदात्तभावना, समुन्नतविचारधारा तथा स्वजीवनस्य नैतिकमूल्यबोधादयः प्रतिफलिताः भवन्ति। ऋग्वेदकालिकः समाजः आदर्शगृहं तथा आदर्शपरिवारमाधारीकृत्य प्रतिष्ठितः आसीत्, यत्र नार्यः सर्वश्रेष्ठस्थानमधिकृत्यवत्यः। यद्यपि परिवारः समाजः वा पितृकैन्द्रिक आसीत्; तथा पिता एव परिवारस्य नियन्त्रक आसीत्, तथापि पारिवारिककार्यकलापेषु मातुः भूमिका अनस्वीकार्या। ऋग्वेदे एतदेव प्रतिपादितं यत् "गृहिणी एव गृहमि" ति यथा -

**"यायेदस्यम्"**[१]।

अतः पारिवारिकजीवने नारी भवति केन्द्रविन्दुस्वरूपिणी, यामाधारीकृत्य सर्वे सानन्दं परिभ्रमन्ति; सर्वे च पारिवारिकस्नेहबन्धने आवद्धाः तिष्ठन्ति। ऋग्वेदे प्रयुक्तात् "दम्पति" शब्दात् एतदेव प्रतीयते यत् सर्वे सर्वान् प्रति सदैव अनुकूलाः भवन्ति यथा -

---

[१] ऋग्वेदः ३.५३.४

**या दम्प॑ती सम॑नसा सुनुत आ च धाव॑तः देवा॑सो नित्य॑याशिरा।**
**प्रति॑ प्रसव्य॑म् इतः सम्यञ्चा॑ ब॒र्हिरा॑स्ते न ता वाजे॑षु वायतः॥** [1]

वैदिकयुगे माता एव जन्मदात्री, पालनकर्त्री, सुरक्षाविधात्री इति तस्याः पूजनम् ऋषिभिः कृतम्। उषा-रात्री-अदिति-पृथ्वीत्यादीनां देवीगणानां प्रभूतमाहात्म्यम्, अखण्डशक्तिश्च वेदे प्रतिपादिता। ऋग्वेदीयनारी प्रभूतशक्तिसम्पन्ना, अप्रतिमशक्तिसामर्थ्यविभूषिता, स्वाधीनचित्ता, पुरुषैः सार्धं यज्ञकार्येऽपि समानदव्यामासीना च।[2] सा यथार्थरूपेण पुरुषस्य पत्नी, या सहधर्मिणीति उच्यते। वैदिकसमाजे अपत्नीकस्य पुरुषस्य यज्ञकार्यसम्पादने अधिकारः नासीदिति उच्यते यथा - **"अयज्ञो वा ह्येष योऽपत्नीकः।"**[3]

तस्मिन् समये स्त्रीशिक्षायाः प्रचलनमासीत्, अतः वैदिकयुगे अनेकाः नारीविदुष्यः शास्त्रचर्चायां स्वपाण्डित्यं प्रदर्शितवत्यः। गार्गी-लोपामुद्रा-लीलावतीत्यादयः वैदिकसूक्तानि विरचितवत्यः। नार्यः प्रायशः द्विविधाः आसन्यथा- १. सद्योद्वाहाः, २. ब्रह्मवादिन्यश्च। सद्योद्वाहाः नार्यः गृहकार्ये लिप्ताः आसन्, ब्रह्मवादिन्यः गृहस्थाश्रमं परित्यज्य आवाल्यब्रह्मचारिणीरूपेण शास्त्रचर्चायां कालापिपातं कृतवत्यः। विविधधर्मकार्येषु नारीणां भूमिका अनस्वीकार्या, अनिर्वार्या चासीत्।

**वेदेषु वर्णितानां नारी-ऋषिकाणां नामानि**

वैदिकसमाजे सुप्रख्यातस्थानमधिकुर्वाणाः नार्यः अध्यात्मभावसम्बलितसूक्तरचनायामपि साक्षात् मन्त्रद्रष्टारः आसन्। ताः प्रायशः त्रिंशत्संख्यकाः आसन्। पञ्चसंख्यकाः नार्यः खिलसूक्तस्य विरचिकाः भवन्ति।

एतासां मध्ये इन्द्राणी-अदिती-सावित्री-यमी-शची-अङ्गिरसी-घोषा-शाश्वती-युहु-रोमशा-लोपामुद्रा -आत्रेयी-विश्ववारादयः ऋषिवंशैः सार्धं संपृक्ताः भवन्ति। उर्वशी-शिखण्डि-काश्यापीत्यादयः नारीऋषयः अप्सरसः आसन्। श्री-लाक्षा-मेधा-उपनिषद्-निषादादयः खिलसूक्तरचयित्र्यः वेदे प्रसिद्धिं लब्धवत्यः। अनया रीत्या मानवीयसभ्यतायाः सुवर्णमयेतिहासस्य पर्णोन्मोचनबेलायां याः नारीऋषिकाः अस्माकं कृते प्रातः स्मरणीयाः भवन्ति ताः भवन्ति यथा -

**१) रोमशाः**

सुप्रसिद्धा नारिऋषिका रोमशा गान्धारदेशसमुद्भवा, ऋषेः बृहस्पतेः सुपुत्री, या एव मन्त्रसाक्षात्कर्त्री ब्रह्मवादिनी आसीत्। यथा - "रोमशा नाम ब्रह्मवादिनी"[4]। तस्याः विवाहः सिन्धुनरेशेण "भावयव्येन" सार्धमभवत्, यः एव परमयशस्वी तथा प्रभूतदक्षताशाली आसीत्। सा ऋषिका सत्यवती, सदाचरणशीला आसीत्, तथा स्वमन्त्रे सा जीवनतत्त्वानां सत्यताम् उद्घोषितवती।

---

[1] ऋग्वेदः ८.३१.५, ६
[2] ऋग्वेदः १.४८.६, १.१२४.८ इत्यादिः
[3] ऋग्वेदः १.१२४.२
[4] ऋग्वेदः १.१२६.७, सायणभाष्यम्

यथा समाजे गृहस्थाश्रमं सर्वश्रेष्ठं भवति। पतिः सदा स्वपत्न्याः परामर्शग्रहणं कुर्यात्। तस्याः मन्त्रेषु एतदेव प्रतिपादितं यथा - "मा मे दभ्राणि मन्दया" - अर्थात् रोमशा कथयति यदहं न न्यूना। पुनः "अहमस्मि रोमशा" - अहं रोमशा अस्मि। अस्मात् ज्ञायते यत् सा आत्मविश्वासेन युक्ता अपूर्वम् उत्साहं प्रदर्शितवती। सा सूत्ररूपेण स्वविचारमुपस्थापितवती, यमाधारीकृत्य भारतीयसमाजः सुदृढः भवितुमर्हति।

**२) अदितिः**

प्रख्यातऋषिका अदितिः देवमाता भवति यदर्थम् इन्द्र-वरुणादयः देवाः आदित्यनाम्ना प्रसिद्धाः भवन्ति। सा अदितिः प्रजापतिदक्षस्य सुपुत्री, अतः सा "दौक्षायणी" नाम्ना प्रख्याता। सा देवीरूपेण सर्वैः पूज्यते। सा माता स्वपुत्रार्थम् इन्द्रार्थं स्तोत्ररचनां कृतवती यथा -

**"उत स्वराजे अदितिः स्तोममिन्द्रायऽजीजनत्।"**[1]

स्वमन्त्रे सा सृष्टिरक्षार्थम् अखण्डज्योतिः पिण्डस्य सूर्यदेवस्याऽपि स्तुतिं कृतवती यथा -

**"अभि यं देव्यदितिर्गुणाति।"**[2]

जन्मग्रहणात् प्राक् कथं गर्भस्थः इन्द्रदेवः, ऋग्वेदस्य चतुर्थमण्डलस्य ऋषिणा वामदेवेन सार्धं वार्त्तालापमकरोत्, तदेव सुन्दरतया अदितेः संवादसूक्ते वर्णितम्। अस्मात् ज्ञायते यत् सा देवमाता अदितिः देवीऋषिका आसीत्।

**३) लोपामुद्रा**

नारीऋषिका लोपामुद्रा महर्षेः अगस्त्यस्य पत्नी, तथा ऋग्वेदस्य प्रथममण्डले स्थितानां कतिपयमन्त्राणां रचयित्री आसीत्। सा स्वपतिदेवस्य सहचारिणी आसीत्। विवाहादनन्तरं स्वपतेः तपः साधनबेलायाम्, सा पतिसेवायां निरता अभवत्। बहुवर्षादनन्तरं ब्रह्मसाक्षात्कारं कृत्वा देवप्रसादमण्डितः ऋषिः अगस्तिः यदा स्वपत्नीं लोपामुद्रां सप्रेम आह्वयति स्म यथा -

**"नदस्यं मा रुधतः काम आर्गं।"**[3]

तदा पतिसेवाक्लान्ताश्रान्ता विगतयौवना लोपामुद्रा मन्त्रमाध्यमेन अकथयत् -

**"अपि तु पत्नी वृषणो जगम्युः।"**

सा नारीऋषिका मन्त्ररचनामाध्यमेन नारीहृदयस्य सुकोमलसंवेदनां प्रतिपादयति स्म।

**४) आपाला आत्रेयी**

प्राचीनयुगे ब्रह्मवादिनी आपाला अत्रिऋषेः सुपुत्री आसीत्, या एव ऋग्वेदस्य अष्टमण्डले स्थितस्य ८०सूक्तस्य रचयित्री भवति। तस्याः पितृकर्त्तृकनाम आत्रेयी। एकदा सा त्वग्दोषेण रुग्णा अभवत् इतिकृत्वा सा स्वपत्या परित्यक्ता आसीत्। एतदर्थं स्वदन्तैः अभिषुतसोमरसदानमाध्यमेन सा

---

[1] ऋग्वेदः ८.११४

[2] ऋग्वेदः ७.३८.८

[3] ऋग्वेदः १.१७९.४

सोमप्रियस्य इन्द्रदेवस्य पूजनमकरोत्। सा प्रार्थनामकरोत् यत् - "कुवित् शकत्" - अर्थात् हे इन्द्र! मां रोगमुक्तं कुरु। पुनः सा अप्रार्थयत् यत् - "कुवित् करन्" - अर्थात् हे इन्द्र! माम् अनेकसन्तानानां जननीं कुरु। परिशेषे इन्द्रदेवस्य असीमयानुकम्पया सा सूर्यत्वक्युक्ता देवाराधनं कृत्वा मानवः कथं रोगमुक्तः भवितुमर्हति, एषा शिक्षा आपालाविरचितान्मन्त्रसकलात् ज्ञायते, येन प्रभावितः अष्टमशतकस्य मयूरकविः यज्ञीयविधिविधानं, देवोपासनादिकं, सूचितवती। देवोपासनामाध्यमेन मानवः असाध्यं साधयितुं कथं प्रभवति, पतिपरित्यक्ताः नार्यः स्वसाधनाबलेन कथं दुर्भाग्यमपि दूरीकर्त्तुं शक्नुवन्ति, एतदर्थं सा आपाला सर्वेषां कृते अद्यापि प्रेरणादायिनी भवति।

**५) विश्ववारा आत्रेयी**

अस्याः नारीऋषिकायाः नाम "विश्ववारा", गोत्रनाम "आत्रेयी" इति वेदभाष्यकारः सायणाचार्यः कथयति यत् -

**"अत्रिगोत्रोत्पन्ना विश्वावारा नामिका अस्य सूक्तस्य ऋषिः"**

विश्ववारा ऋग्वेदस्य पञ्चमण्डलस्य अष्टाविंशतितमसूक्तस्य रचयित्री आसीत्। अमृततत्त्वानां प्रकाशकस्य अग्निदेवस्य स्तुतिं मार्मिकरीत्या कुर्वाणा विश्ववारा कथयति यत् -

**"समिध्यमाना अमृतस्य राजसि।"**

पुनश्च - **"विश्वं धत्ते द्रविणम्।"** अर्थात् हे अग्निदेव ! यह् तव पूजनं करोति, स एव कृपालाभं कृत्वा धनधान्यसम्पन्नः भवितुमर्हति। अतः हे देव ! भक्तान् प्रति कृपां कुरु। परमसौभाग्यलाभार्थमपि सा ऋषिका प्रार्थयति यत् - **"महते सौभगाय।"**

तथा च - **"समिद्धस्य प्रमहसोऽग्ने वन्दे तव श्रियम्।"**

अर्थात् हे दीप्यमान अग्ने ! वयं सर्वे तव समृद्धि-वैभव-सौन्दर्यस्य वन्दनां कुर्मः।

वास्तवतः विश्ववारा अनन्यसाधारणा नारीऋषिका, या सर्वासां नारीऋषिकाणां मध्ये वंशमण्डले स्वतन्त्रस्थानमधिकृतवती।

**६) गार्गी वाचक्नवी**

एषा नारीऋषिका वचक्नोः सुपुत्री तथा गार्गी नाम्ना उपनिषद्युगे अतीवसुप्रसिद्धा ब्रह्मवादिनी आसीत्। सा असामान्यप्रतिभाशालिनी एकदा मिथिलनरेशजनकस्य विद्वज्जनमण्डितायां सर्वश्रेष्ठब्रह्मसाक्षात्कर्त्रारं याज्ञवल्क्यं प्रति तस्याः सकलप्रश्नाः सृष्टितत्त्वम्, तथा जीवनदर्शनमाधारीकृत्य आसन्, येषामुत्तरम् अपि तया सम्यक्तया ज्ञातमासीत्। सा यथार्थरूपेण ब्रह्मविद्यापारंगता प्रख्यातवैदिकविदुषी आसीत्।

एतान् विहाय वैदिकयुगे याः नार्यः ऋषिकाः स्ववैदुष्यबलेन समाजे सर्वश्रेष्ठस्थानमधिकृतवत्यः, ताः भवन्ति यथा - शाश्वती, आङ्गिरसी, सिकता निवावरी, श्री, लाक्षा, मेघा, इन्द्रमातरः, जुहूब्रह्मजाया, अगस्त्यस्वसा, वाध्रिमती, नद्यः, मैत्रेयी, यम-पत्नी, आटिकी, उमा हैमवती, विशला, जवाला, मुद्गलानी, यमी वैवस्वती, उपनिषद्-निषद्, शची पौलोमीत्यादयः। एताः नारीऋषयः स्वकीयदिव्यदृष्टिबलेन सृष्टेः रहस्यं तथा जीवनस्य सत्यान्वेषणं कृत्वा मानवानां कृते अपूर्वं सन्देशं प्रदत्तवत्यः यमाधारीकृत्य

आधुनिकसमाजधारा प्रवहमाना भवति, भविष्यति च। मानवसमाजस्य कल्याणविधानार्थं तथा समग्रविश्वस्य सुखशान्तिसमृद्धिसाधनार्थं तासां जीवनमुत्सर्गीकृतम् आसीदितिकृत्वा ताः देव्यः अस्माकं कृते सदा आदर्शस्थानीयाः भविष्यन्ति।

केचन समालोचयन्ति यत् नारीणां तथा शूद्राणां वेदेषु अधिकारः नास्ति। एतत् समालोचनं सम्पूर्णम् अमूलकम्। प्राचीनकाले नारीणां स्थानमुपरि एव आसीत्। ताः सर्वैः पूज्याः वन्दनीयाश्च अभवन्। मनुना उक्तम् -

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।"**

नार्यः संस्कार-संस्कृतिसम्पन्नाः भवन्ति। अतः संस्कार-संस्कृतिसंस्कृतानां पुरुषाणामथवा नारीणां वेदाध्ययने वेदाचरणे च असौविध्यं कुतः ? हिमगिरिकन्या पार्वती यदा तपश्चरितवती तदा सा अहर्निशं वेदपाठं कृतवती आसीत्। अतः कुमारसम्भवे उक्तम् -

**कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।**
**दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्म वृद्धेषु वयः समीक्ष्यते ॥**[१]

अत्र "अधीतिनीम्" इत्यस्य तात्पर्य्यं भवति यत् "वेदाध्ययानं कुर्वन्तीम्" पार्वतीं द्रष्टुकामाः ऋषयः आश्रमं प्रति आगतवन्तः। एवं प्रकारेण बहूनि उदाहरणानि सन्ति, येभ्यः सर्वेषु वैदिककार्यक्रमेषु नारीणां गुरुत्वपूर्णा भूमिका आसीत् इति ज्ञायते। अतः वैदिकपरम्परासंरक्षणेऽपि नारीणां भूमिका गुरुत्वपूर्णा भवति।

**डॉ. शारदासामन्तरायः**
विभागीयमुख्या,
सामन्तचन्द्रशेखरमहाविद्यालयः, पुरी

[१] कुमारसम्भवे ५.१६